अस्मिन् प्रश्नपत्रपुस्तिकायाम् 28 प्रश्नाः [खण्ड—क (20) + खण्ड—ख (4+4)] एवं 10 पृष्ठाः सन्ति।

Roll No.
अनुक्रमांक

| | | | | | | | | | | | |
|---|---|---|---|---|---|---|---|---|---|---|---|
| | | | | | | | | | | | |

**Code No.** **54/SS/A/S**
**कोड नं०**

**Set/सेट** **A**

# संस्कृतम्

## (309)

Day and Date of Examination ..........................................................................
(परीक्षादिवसः दिनाङ्कश्च)

Signature of Invigilators 1. .......................................................
(निरीक्षकयोः हस्ताक्षरम्)

2. .......................................................

---

***सामान्य अनुदेशाः —***

1. परीक्षार्थी प्रश्नपत्रपुस्तिकायाः प्रथमपृष्ठे स्व-अनुक्रमाङ्कम् अवश्यं लिखतु।
2. निरीक्ष्यतां यत् प्रश्नपत्रस्य पृष्ठसंख्या प्रश्नानां संख्या च प्रथमपृष्ठस्य शीर्षे मुद्रितसंख्यानुसारमेव अस्ति। प्रश्नाः क्रमानुसारं सन्ति न वा इत्यपि निरीक्षणीयम्।
3. उत्तरपुस्तिकायां परिचयचिह्नम् अथवा कुत्रापि निर्दिष्टस्थानेतरस्थलेषु अनुक्रमाङ्कलेखनं सर्वथा वर्जितम् अस्ति।
4. स्व-उत्तरपुस्तिकायां प्रश्नपत्रस्य कोड संख्या 54/SS/A/S, सेट A अवश्यमेव लेखनीया।

# संस्कृतम्

# (309)

समयः —होरात्रयम् ] [ पूर्णाङ्काः —100

**निर्देशाः —** (i) अस्मिन् प्रश्नपत्रे **द्वौ** खण्डौ स्तः। खण्ड—क (केन्द्रिकः पाठ्यक्रमः), खण्ड—ख (वैकल्पिक–I एवं वैकल्पिक–II) स्तः।

(ii) खण्ड—क अनिवार्यः। अस्मिन् खण्डे 20 प्रश्नाः सन्ति।

(iii) खण्ड—ख **एकः** एव वैकल्पिकः समाधेयः।

(iv) खण्ड—क कृते *85* अङ्काः, खण्ड—ख संस्कृतं संस्कृतिश्च अथवा प्रयोजनमूलकसंस्कृतम् इति वैकल्पिकयोः केवलम् एकः एव वैकल्पिकः समाधेयः। अस्य कृते *15* अङ्काः निर्धारिताः।

## खण्ड—क

## केन्द्रिकः पाठ्यक्रमः

**1.** अधोलिखितेषु कस्यचि**देकस्य** पाठस्य सारं षड्वाक्येषु लिखत— 6

(क) एतद् उपास्यम्

(ख) अतिलोभः न कर्त्तव्यः

(ग) शल्यचिकित्साजनकः —सुश्रुतः

**2.** अधोलिखितं गद्यांशं पठित्वा प्रश्नान् संस्कृतेन उत्तरत— 1×4=4

अत्र विशिष्टं ध्यानमन्दिरम् अस्ति। स्मारकस्य अंधकारमये प्रकोष्ठे पुरतः 'ॐ' इत्यस्य चित्रं दृश्यते। अत्र सर्वे मौनं तिष्ठन्ति। शिला-स्मारकस्य विशाले परिसरे देश-विदेशेभ्यः पर्यटकाः आगत्य अस्य सुंदरतां पश्यन्ति साधनां च कुर्वन्ति।

**प्रश्नाः**

(क) विशिष्टं ध्यानमन्दिरं कुत्र अस्ति?

(ख) अंधकारमये प्रकोष्ठे कस्य चित्रं पुरतः दृश्यते?

(ग) प्रकोष्ठे सर्वे कथं तिष्ठन्ति?

(घ) पर्यटकाः तत्र आगत्य किं कुर्वन्ति?

**3.** अधोलिखितानां प्रश्नानाम् उचितमुत्तरं कोष्ठकात् चित्वा लिखत— 1×4=4

(क) कन्याकुमारी भारतस्य कस्मिन् भागे स्थिता? (दक्षिणे / पश्चिमे)

(ख) कानि कर्माणि शिष्येण सेवितव्यानि? (अवधानि / सुचरितानि)

(ग) जीवकः कस्य मस्तिष्कस्य शल्यक्रियाम् अकरोत्? (सुश्रुतस्य / भोजराजस्य)

(घ) कः दरिद्रः अपि सच्चरित्रवान् आसीत्? (शर्विलकः / चारुदत्तः)

**4.** (क) रेखाङ्कितपदमाश्रित्य प्रश्ननिर्माणं कुरुत— 1×2=2

*(i)* कस्मिंश्चित् ग्रामे चत्वारि मित्राणि अवसन्।

*(ii)* ते तस्य मठम् अगच्छन्।

(ख) प्रश्नान् उत्तरत— 1×2=2

*(i)* दुर्वासाः कस्य मुनेस्तनयः आसीत्?

*(ii)* कस्य सेवनेन जरारहित देहप्राप्तिः भवति?

**5.** एतत् कथनं कः कं प्रति कथयति? 2

(क) सखि, संहर रोषम्, असंस्कृतमतयोऽपि मुनयः माननीयाः।

(ख) उपाध्याय, स्खलितमेकं क्षमस्व।

**6.** अधोलिखितपद्यांशद्वयं पठित्वा प्रश्नान् उत्तरत— 2×2=4

(क) अस्त्युत्तरस्यां दिशि देवतात्मा,
हिमालयो नाम नगाधिराजः।
पूर्वापरौ तोयनिधी वगाह्य,
स्थितः पृथिव्या इव मानदण्डः।।

**प्रश्नद्वयम्—**

*(i)* हिमालयः कस्यां दिशिः स्थितः अस्ति?

*(ii)* हिमालयः किमिव स्थितः?

(ख) दूषितं परदोषर्हि गृह्णीते योऽन्यथाशुचिम्।
स्वयं संदूषितामात्यः क्षिप्रमेव विनश्यति॥

**प्रश्नद्वयम्—**

*(i)* शुचिं जनं राजा किमर्थं दण्डयति?

*(ii)* कीदृशः राजा क्षिप्रमेव विनश्यति?

**7.** अधोलिखितयोः अन्वयद्वयोः रिक्तस्थानपूर्तिं कुरुत— 2

(क) अक्रोधेन जयेत् क्रोधमसाधुं साधुना जयेत्।
जयेत् कदर्यं दानेन जयेत् सत्येन चानृतम्॥

अन्वयः —

क्रोधम् अक्रोधेन _____ , असाधुं साधुना जयेत्, कदर्यं _____ जयेत्, अनृतं च सत्येन जयेत्।

(ख) अपूर्वोऽयं मया दृष्टः कान्तः कमललोचने।
शोऽन्तरं यो विजानाति स विद्वान्नात्र संशयः॥

अन्वयः —

कमललोचने, मया अयम् अपूर्वः _____ दृष्टः। यः शोऽन्तरं यो _____ सः विद्वान् नात्र संशयः।

**8.** अधोलिखितपद्यांशद्वयस्य भावार्थयोः रिक्तस्थानानि पूरयत— 2

(क) सन्तोषामृततृप्तानां यत् सुखं शान्तचेतसाम्।

भावार्थः —

ये संतोषरूपिणा अमृतेन तृप्ताः ते एव _____ प्राप्नुवन्ति।

(ख) निद्रालाभः सुखं च स्यात् मूर्ध्नि तैलनिषेवणात्।

भावार्थः —

शिरस्त्रि तैलाभ्यंगनेन सुखपूर्वकं _____ भवति।

**9.** पद्यांशं 'अ' स्तम्भात् 'ब' स्तम्भेन सह मेलयत— 2

| स्तम्भ—अ | | स्तम्भ—ब | |
|---|---|---|---|
| *(i)* | कस्मै स्पृह्यति कमला | (क) | उभयं नाशयेदिदम् |
| *(ii)* | कस्तूरी जायते कस्मात् | (ख) | त्वनलसचित्ताय नीतिवृत्ताय |
| *(iii)* | अपूजितं तु तद् भुक्तम् | (ग) | मृगात् सिंह-पलायनम् |
| *(iv)* | कुतस्तद्धनलुब्धानाम् | (घ) | इतश्चेतश्च धावताम् |

**10.** 'काले फलति सौभाग्यम्' इति नाटकस्य सारांशं षड्वाक्येषु लिखत। सहायतायै बिन्दवः दत्ताः — 6

**बिन्दवः**

लब्धदत्तः, निर्धनः, राज्ञः, कृतवान्, राजा, वीजपूरफलं, उदरपूरणाय, एकेन रूप्यकेण, राजा, परीक्षितुं, साधुं, नर्तकीं, व्यापारिणाम्, सर्वे, अयच्छत्, राज्ञे, अन्ते, प्रदर्श्य, रत्नानि, यच्छति।

**11.** (क) अधोलिखितं नाट्यांशं पठित्वा प्रश्नान् उत्तरत— 1+1=2

गोपालकः : (ब्राह्मणवेशान् यक्षान् विलोक्य) स्वागतम्, अत्र भवताम्। कुतः समायाताः भवन्तः?

यक्षाः : अरण्यदर्शनोत्सुकाः वयम् इहागताः स्मः। परं त्वम् एकाकी विचरन्, वंशी च वादयन् भीतिं न अनुभवसि?

गोपालकः : कुतो भीतिः? भगवति बोधिसत्त्वे मैत्रीबले राज्यं शासति सर्वाः प्रजाः निर्भयाः सन्ति। कश्चित् कमपि पीडयितुं न प्रभवति।

यक्षाः : किं राक्षसाः अपि?

गोपालकः : अथ किम्। यदि कौतूहलं, श्रूयताम्।

**प्रश्नाः**

*(i)* यक्षाः वने किमर्थं गताः?

*(ii)* कस्मिन् शासति सर्वाः प्रजाः निर्भयाः सन्ति?

(ख) विभवानुगता भार्या सुखदुःखसुहृद्भवान्।
सत्यं च न परिभ्रष्टं यद् दरिद्रेषु दुर्लभम्।।

**प्रश्नाः** 1+1=2

*(i)* चारुदत्तस्य भार्या कीदृशी?

*(ii)* दरिद्रेषु किं दुर्लभं भवति?

**12.** अधोलिखितं गद्यांशं पद्यांशं च पठित्वा उभयोः प्रदत्त-प्रश्नान् उत्तरत—

(क) **गद्यांशः**

भारतीयैः पाश्चात्यैश्च विद्वद्भिः मुक्तकण्ठेन स्वीकृतमुद्घोषितश्च यत् भारतीया संस्कृतिः विश्वसंस्कृतिषु प्राचीनतमा वर्तते। भारतीया संस्कृतिः धर्मप्रधाना वर्तते। नात्र धर्मशब्देन कश्चित् सम्प्रदायविशेषः संगृह्यते, अपितु सार्वभौमधर्म एव। येन मानवानां लौकिकं पारलौकिकं च सर्वविध कल्याणं भवति स एव धर्मः। धर्म सदैव कल्याणकारी भवति।

**प्रश्नाः**

*(i)* अस्य गद्यांशस्य शीर्षकं लिखत। 1

*(ii)* भारतीया संस्कृतिः किं प्रधाना वर्तते? 2

*(iii)* अत्र धर्मशब्देन किं गृह्यते? 2

(ख) **पद्यांशः**

कर्मण्येवाधिकारस्ते मा फलेषु कदाचन।
मा कर्मफलहेतुर्भूः मा ते सङ्गोऽस्त्वकर्मणि।।

**प्रश्नाः**

*(i)* अस्य श्लोकस्य शीर्षकं लिखत। 1

*(ii)* कुत्र ते सङ्गो माऽस्तु? 2

*(iii)* कुत्र तेऽधिकारः? 2

**13.** मञ्जूषापदसहायतया 'उद्यानम्' इति विषयमधिकृत्य दशवाक्यानि लिखत— 1×10=10

| **मञ्जूषा** |
| --- |
| प्रातःकाले, कूजन्ति, भ्रमणम्, शुद्धवातावरणम्, खगाः, भ्रमन्ति, पुष्पाणि, केचन, शीतलवायुः, दक्षिणः, व्यायाम, अत्र, वहति, क्रीडन्ति, पादपाः, प्रसन्नाः, जनाः, प्रतिदिनं, स्वास्थ्यप्रदं, भवति, आगच्छन्ति। |

**14.** भवान् शारदेन्दुः। भवतां निवासक्षेत्रे विद्युतापूर्तिः यदा कदा बाधिता भवति। तदर्थं विद्युत्परिषदं प्रति पत्रं लिखत। 6

**15.** भवतः नाम ज्ञानेशः। श्व भवतः जन्मोत्सवः अस्ति। अतः तमुपलक्ष्य स्वमित्राय रमेशाय दूरभाषसंवादं लिखत। चत्वारि वाक्यानि लिखत। 1×4=4

**16.** रेखाङ्कितपदे सन्धिच्छेदं कुरुत— ½×2=1

(क) परायणं ज्योतिरेकं प्रसन्नम्।

(ख) श्रृंगाणि यस्यातपवन्ति सिद्धाः।

**17.** (क) रेखाङ्कितपदे का विभक्तिः किं च मूलपदम्? 2

कस्य वशे जगदेतत्?

(ख) रेखाङ्कितपदद्वयं लट्लकारे परिवर्त्य लिखत— 2

राजा भोजः पुत्तलिकाम् अवदत्।
तस्य अष्ट पुत्राः आसन्।।

**18.** समुचितपदनिर्माणं कृत्वा रिक्तस्थानं पूरयत— 1×4=4

(क) सः बहुमूल्यं वस्त्रं _____ सभायाम् आगच्छति। (आ + दा + ल्यप्)

(ख) कंसः षड्यंत्रैः कृष्णं बलरामं च _____ प्रयासं करोति। (हन् + तुमुन्)

(ग) सेवकः _____ वदति। (उप + विश् + ल्यप्)

(घ) कृष्णः _____ दुष्टं कंसं हतवान्। (बाल्यकाल + उचितविभक्ति)

**19.** यथानिर्दिष्टं कुरुत— 1×4=4

(क) मातापितरौ पूज्यौ भवतः। (रेखाङ्कितपदस्य विग्रहं कुरुत)

(ख) तेन जीवहिंसा त्यज्यते। (कर्तृवाच्ये परिवर्तनं कुरुत)

(ग) कस्मै प्रदीयते भवता? (उपसर्गं चिनुत)

(घ) समुद्राः पदतलं क्षालयन्ति निरन्तरम्। (अव्ययं चिनुत)

**20.** अधोलिखितवाक्ये **एकम्** अव्ययम् **एकम्** उपसर्गं च चित्वा लिखत— 2

(क) दामोदरः बलरामेण सह गच्छतु।

(ख) गीतायां कर्मणः महत्त्वं प्रतिपादितम्।

## खण्ड—ख

## वैकल्पिक–I

## ( संस्कृतं संस्कृतिश्च )

**21.** अधोलिखितकाव्यानां तेषां लेखकैः सह मेलनं कृत्वा लिखत— 2

| | **स्तम्भ—अ** | | **स्तम्भ—ब** |
|---|---|---|---|
| *(i)* | जवाहरज्योतिमहाकाव्यम् | (क) | श्रीनिवास रथः |
| *(ii)* | तदेव गगनं सैव धरा | (ख) | डा० रामजी उपाध्यायः |
| *(iii)* | द्वा सुपर्णा | (ग) | सत्यप्रकाश सिंहः |
| *(iv)* | गुहावासी | (घ) | जी० बी० पल्सुले |

**22.** अधोलिखितप्रश्नान् उत्तरत—

(क) अधोलिखितसंख्यानां कृते संस्कृतपदानि लिखत— 2

$10^{22}$, $10^{32}$, $10^{37}$, $10^{55}$

(ख) 'अयुतम्' इत्यस्य प्रयोगः अनेकशः कस्मिन् ग्रन्थे प्रयुक्तः? कस्मिन् अर्थे च अस्य प्रयोगः? 2

(ग) लक्षगुणनोत्तरप्रणाल्याः सुन्दरम् उदाहरणं कस्मिन् ग्रन्थे प्राप्यते? 1

(घ) कृषिशास्त्रस्य विश्वकोशः कः ग्रन्थः कथ्यते? तस्य ग्रन्थस्य रचयिता कः अस्ति? 2

**23.** द्रविड-भाषा-परिवारे काः भाषाः सन्ति? 2

**24.** (क) वर्णाः के? तेषां नामानि लिखत। 1

(ख) संस्काराः कति संख्याकाः भवन्ति? 1

(ग) ब्रह्मचर्याश्रमानन्तरं युवा कस्मिन् आश्रमे प्रविशति? तत्र प्रवेष्टुं कः संस्कारः क्रियते? 2

## वैकल्पिक–II

### ( प्रयोजनमूलकसंस्कृतम् )

**21.** अधोलिखितवाक्येषु रिक्तस्थानानि पूरयत— 1×4=4

(क) आर्यभट्टेन त्रिभुजस्य _____ उपवर्णितम्।

(ख) अद्य प्राच्यविज्ञानस्य _____ सह समन्वयस्य आवश्यकता अस्ति।

(ग) ब्रह्मगुप्तः _____ नियमान् निर्मितवान्।

(घ) बी० ए० एम० एस० पाठ्यक्रमे _____ ज्ञानम् अनिवार्यता अपेक्षते।

**22.** अधोलिखितप्रश्नान् उत्तरत— 1×4=4

(क) दूरदर्शने संस्कृतवार्त्तानां दैनिकं प्रसारणं कस्मिन् वर्षे आरब्धम्?

(ख) जनसंचारस्य वार्त्तानां स्रोतांसि कतिविधानि भवन्ति?

(ग) 'डीडी-ज्ञानदर्शनम्' इति प्रणालिकाः प्रतिसप्ताहं कति दिवसेषु संस्कृतकार्यक्रमं प्रसारयति?

(घ) आकाशवाणीभवने वार्त्ताकक्षे सम्पादकाः किं कुर्वन्ति?

**23.** 'अर्वाचीनसंस्कृतम्' इति पत्रिका कुतः प्रकाश्यते? तस्या प्रकाशनसंस्थायाः नाम किम्? 1+1=2

**24.** (क) पत्रपत्रिकासु चित्राणाम् उचितं संयोजनस्य आधारः किं भवति? 1

(ख) 'नवप्रभातम्' इति दैनिकसमाचारपत्रं कुतः प्रकाश्यते? 1

(ग) पत्रपत्रिकाणां प्रकाशनाय केषां नियमानां पालनं सम्पादकेः कर्त्तव्यम्? 1

(घ) त्रुटिशोधने प्रयुक्तम् अधोलिखितं चिह्नद्वयं अभिप्रायेण सह मेलयत— 2

| | अ | | ब |
|---|---|---|---|
| *(i)* | (-) | (क) | विवरण-चिह्नम् |
| *(ii)* | (:) | (ख) | योजक-चिह्नम् |

★ ★ ★